गुरुसम्मत पदार्थाः of some anonymous author - and - कुमारिलमतोपन्यासः of नारायण - Two treatises on पूर्वमीमांसा - Edited with an Introduction in English by Surnad Kunjan Pillai. (Trivandrum Sanskrit Series No. 171), Trivandrum, 1954.

1338

15

Philosophy / Trivandrum Skt. Series


Bill No. 4/07-08
25
2008-0411


Indira Gandhi National Centre for the Arts

UNIVERSITY OF TRAVANCORE
TRIVANDRUM SANSKRIT SERIES NO. 171.

# GURUSAMMATAPADĀRTHĀḤ

AND

# KAUMĀRILAMATŌPANYĀSAḤ

PUBLISHED BY
SURANAD KUNJAN PILLAI M. A.,
Honorary Director,
University Manuscripts Library,
TRIVANDRUM.
1954/1129

All rights reserved] [[redacted]

1338

अनन्तशयनविश्वविद्यालयः

अनन्तशयनसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः १७१.

# गुरुसम्मतपदार्थाः कौमारिलमतोपन्यासश्च ।

UNIVERSITY OF TRAVANCORE

DEPARTMENT OF PUBLICATIONS TRIVANDRUM UNIVERSITY OF TRAVANCORE

Indira Gandhi National Centre for the Arts

प्रकाशकः

शूरनाड् कुञ्ञन् पिळ्ळ एम्. ए.,

पौरस्त्यग्रन्थप्रकाशनकार्यालयाध्यक्षः ।

अनन्तशयने अलयन्स् मुद्रालये मुद्रितः ।

१९५४/1129.

DATA ENTERED
Date 01/07/08

SANS
181.4
GUR

KALANIDHI
Rare Book Collection
IGNCA
ACC No.: R-411
Date: 26.3.08

# INTRODUCTION

"Gurusammata Padārthāḥ" and "Kaumārila Matōpanyāsaḥ" are two short treatises, the first dealing with the categories according to Prabhākara, and the second dealing with the outlines of Kaumārila School of Pūrvamīmāmsā.

## (i)

The edition of "Gurusammata Padārthāḥ" is based on manuscript No. C. O. L. 1699 of this Library. This has been obtained from Sri Kes'ava Pishārodi of Kadutturutti. The manuscript is in Malayalam script and written on palmleaf. No information is available about the author or the date of the work. Even the name of the work is not found in the manuscript. The title is deduced from the passage 'Padārtha Gurusammataḥ'.

Indira Gandhi National

'Gurusammata Padārthāḥ' classifies and defines Padārthas (categories) in accordance with the Prabhākara School. Guru, as is well known, is Prabhākara, the celebrated disciple of Kumārila. The categories enumerated agree substantially with the Vais'ēsika School, although there are some points of difference. While the Vais'ēsikas have only seven categories (द्रव्य-गुण-कर्म-सामान्य-विशेष-सम-वायाभावा:) the Prabhākara School adds one more to the list, viz. s'akti.

द्रव्यजातिगुणाः कर्मसङ्ख्यासादृश्यशक्तयः ।
समवाय इतीमेऽष्टौ पदार्था गुरुसम्मताः ॥

The difference may be noted in the enumeration of both the schools. Both the schools do not accept तमस् (darkness) as a dravya.

Saṅkhyā (Number) is regarded as a Guṇa (quality) by the Vais'ēṣika School, but it is one of the categories according to Prabhākara System. There are twentyfour guṇas (qualities) in the Vais'ēṣika System including Saṅkhyā.

In regard to the enumeration of Karma (Action) also there is difference between these two schools. According to Prabhākara Karma is only one kind whereas the Vais'eṣikas classify Karma as five:—

उत्क्षेपणमपक्षेपणमाकुञ्चनं प्रसारणं गमनमिति कर्माणि ।(वैशेषिकसूत्र० अ० १ सू० ७)

So also in regard to समवाय (invariable concomitance). Samavāya is only one and everlasting according to the Vais'eṣika System. The Prabhākaras hold that it is innumerable and not everlasting.

Other points of difference are also enumerated in the list appended:—

1. तत्र पृथिव्यादिवायुपर्यन्तानां प्रत्यक्षमेव प्रमाणम् । (गु० स० प० P. 7)
   न च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः । (वै० सू० अ० २ सू० १०)
2. अन्यथा व्यावृत्त्यसिद्धेः स[१] एव विशेष इत्युच्यते । (गु० सं० प० P. 8)
   नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः (तर्कसंग्रहः)
3. स्थितस्थापकस्तु नास्त्येव पूर्वावस्थाप्राप(क)कर्मणः घनावयवसंयोगस्य कारणत्वसम्भवात् (गु० सं० प० P. 11)
   अन्यथा कृतस्य पुनस्तदवस्थापादकः स्थितस्थापकः कटादिपृथिवीवृत्तिः (तर्कसंग्रहः)

( ii )

Kaumārila Matōpanyāsa is, as its name indicates, a treatise on the system of Pūrvamīmāmsā Philosophy propounded by Kumārila.

The Present edition of the work is based on manuscript No. 1207 D. obtained from Narīrimana, Kudallūr. The manuscript is in Palmleaf and in the Malayalam script.

The philosophical system of Kumārila is based on the theory of Dharma and Apūrva. Dharma according to him is Yāga

१. पृथक्त्वम्.

Indira Gandhi National Centre for the Arts

etc. and they produce what is called Apūrva, that is, merit which did not exist before. The verse outlining his theory is quoted below:—

धर्मो यागादिरूपः स तु सुरनगरप्राप्तिपश्वादिलाभे
हेतुः कुर्वन्नपूर्वं निगमवचनमेवाखिलं तत्र मानम् ।
नित्यान्येतानि सर्वाण्यपि न तु विहितानीश्वरेणापरैर्वा
प्रामाण्यस्य स्वतस्त्वं भवति च निखिलानाञ्च मानान्तराणाम् ॥

The treatise opens with a discussion of Pramāṇas, proofs or sources of valid cognition, and also Pramēya, things proved i. e. object of knowledge. The author then proceeds to discuss the prāmāṇya, the validity of pramāṇa, etc.

Kumārila recognizes only five pramēyas (Padārthas as they are called elsewhere) as against seven Padārthas of the Nyāya Vaiseṣika School. The five pramēyas are द्रव्य-जाति-गुण-कर्माभावाः । But he has eleven Dravyas in the place of nine Dravyas of the Nyāya Vais'eṣika system.

The following verses summarise his views on the above:—

द्रव्यं जातिर्गुणः कर्माप्यभावश्चेति पञ्चधा ।
प्रमेयं विभजन्त्येते कुमारिलमतानुगाः ॥

पृथिवी सलिलं तेजः पवमानस्तमस्तथा ।
व्योमकालदिगात्मानो मनः शब्द इति क्रमात् ॥

एकादशविधं द्रव्यं कुमारिलमते मतम् ।

According to the colophon of the work the author of the treatise is one Nārāyaṇa, a disciple of Subrahmanya.

इति श्रीसुब्रह्मण्यपूज्यपादशिष्यस्य नारायणस्य कृतौ भगवदज्जुकरणकौमारिल-
मतोपन्यासः समाप्तः ।

There is reason to identify him with the author of the pramēya part of Mānamēyōdaya, who flourished in the latter half of the 17th century (vide Introduction to Āṣlēṣās'atakam, Journal of Travancore University Oriental Manuscripts Library Vol. II No. I, page 8 )

य: ख्यात: पुरुषोत्तमस्त्रिजगति प्रज्ञाकवित्वादिभि:
पुन्यास्तस्य सुतस्तदीयतनयात् कौमारतन्त्राम्बुधे: ।
सुब्रह्मण्य इति त्रिलोकविदितादापीतशास्त्रामृत:
सोऽहं पूरितवानिदं प्रकरणं नाम्ना च नारायण: (Mānamēyōdaya)

Several verses are common. Eg:—

| | Mēya part of Mānamēyōdaya | Kaumārila Matōpanyāsaḥ |
|---|---|---|
| पृथिवी सलिलं तेज: पवमानस्तमस्तथा । | | |
| व्योमकालदिगात्मानो मन: शब्द इति क्रमात् ॥ | 7 | 43 |
| एकादशविधं द्रव्यं कुमारिलमते मतम् । | 8 A | 44 A |
| कलायकोमलच्छायं दर्शनीयं भृशं दृशाम् ॥ | | |
| तम: कृष्णं विजानीयादागमप्रतिपादितम् । | 9 | 48 |
| गुणकर्मादिसद्भावादस्तीति प्रतिभासत: ॥ | | |
| प्रतियोग्यस्मृतेश्चैव भावरूपं ध्रुवं तम: । | 10 | 50 |

Indira Gandhi National

Both the works presented here are valuable in so far as they give succint summaries of the Prabhākara and Kumārila Systems. They serve as useful introduction to the study of these systems.

These works had been scrutinized for publication by Sri V. G. Nampūtiri, Pandit of the Library. The Gurusammata padārthāḥ was edited under the supervision of Dr. P. K. Nārāyaṇa Pillai, when he was Curator, and Kaumārila Matōpanyāsaḥ under the supervision of Sri. K. S. Mahadeva Sastri, Superintendent.

It is hoped that the world of scholarship will welcome this publication.

Suranad Kunjan Pillai
*Honorary Director.*

॥ श्रीः ॥

# गुरुसम्मतपदार्थाः

द्रव्यजातिगुणाः कर्म सङ्ख्यासादृश्यशक्तयः ।
समवाय इतीमेऽष्टौ पदार्था गुरुसम्मताः ॥ १ ॥

तेषां लक्षणमुच्यते । तत्र सामान्यतो दृष्टानुमानं लक्षणवचनस्यार्थः । पृथिव्यादिमनोऽन्तं गुणादिभ्यो भिद्यते, तेभ्यो व्यावृत्तधर्मकत्वात् । यद्यतो व्यावृत्तधर्मकं तत्ततो भिद्यते, यथा शीताद्व्यावृत्तधर्मकमुष्णम् ।

Centre for the Arts

भूजलाग्निमरुद्व्योमकालदिक्चित्तचेतनाः ।
नव द्रव्याणि लक्ष्यन्ते स्वात्मजारम्भकत्वतः ॥ २ ॥

तमस्तु नास्त्येव, आलोकाभावरूपत्वादिति ।

रूपरसगन्धस्पर्शशब्दपरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्कारबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मास्त्रयोविंशतिरेव गुणाः ।

कर्म एकमेव । उपाधितोऽनेकत्वम् ।

सामान्यं द्विविधं परमपरं च, वृक्षत्वशिंशपात्वभेदात् ।

शक्तिरनेका, कार्यानुमेयत्वात् ।

गणितव्यवहारहेतुः एकत्वादिपरार्द्धपर्यन्ता सङ्ख्या ।

सादृश्यज्ञानविषयत्वं सादृश्यं बहुविधं, तद्व्यञ्जकसाधर्म्यभिन्नत्वात् ।

समवायस्त्वनेक एव इति ॥

द्रव्यलक्षणं संयोगाश्रयत्वं विभागाश्रयत्वं वा परिमाणाश्रयत्वं वा।

भूलक्षणं पाकजस्पर्शाश्रयत्वं वा पाकजरूपाश्रयत्वं वा पाकजरसाश्रयत्वं वा गन्धाश्रयत्वं वा, असाधारणधर्मत्वात्तेषाम्।

रूपगन्धरसस्पर्शपरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वनैमित्तिकद्रवत्वसंस्कारास्त्रयोदश गुणाः। पाकजाश्च रूपरसाः पृथिव्यामेव। तत्सम्पर्काज्जलादौ तेषामुपलम्भः, तदपगमे तदनुपलम्भाद्। गन्धस्तु तस्या एव। स द्विविधः सुरभिरसुरभिश्च। पाकजोऽनुष्णाशीतस्पर्शः तस्या एव। रूपरसावनियतौ।

सा च द्विधा नित्यानित्या च – परमाणुलक्षणा कार्यलक्षणा च। तत्र कार्यं त्रिविधं शरीरेन्द्रियविषयसंज्ञकम्। तत्र मनस्त्वगिन्द्रियायतनं शरीरं, भोगायतनं वा। तच्च द्विविधं योनिजमयोनिजं चेति। शुक्रशोणितसन्निपातो योनिः। तदुत्पन्नं योनिजम्। तदपि द्विविधं जरायुजमण्डजं च। उद्भिज्जं तु नास्त्येव, अयोनिजत्वसामान्यतो ....। अयोनिजं तु क्षुद्रजन्तूनां शरीरं यातनाशरीरम्।

इन्द्रियं तु गन्धव्यञ्जकं घ्राणम्। यच्च शरीरसंयुक्तमतीन्द्रियं साक्षात्प्रतीतिकारणं तदिन्द्रियमुच्यते।

प्रतीयमानतया भोगसाधनं विषयः। स च द्व्यणुकादिक्रमेण आरब्धः त्रिविधो मृत्पाषाणस्थावरलक्षणः। क्रमे कारणमुच्यते – त्रसरेणवो महान्तः, चाक्षुषद्रव्यत्वाद् घटवत्। ते च कार्याः, महत्त्वाद् घटवत्। ते च सावयवाः, कार्यत्वात् घटवत्। त्रसरेण्ववयवा न महान्तः, आरम्भकद्रव्यत्वे सत्यप्रत्यक्षत्वात् परमाणुवत्। त्रसरेणवः कार्यद्रव्येण आरब्धाः, महत्त्वे सति कार्यत्वाद् घटवत्। त्रसरेण्वारम्भकं कार्यद्रव्यं सावयवं, कार्यद्रव्यत्वाद् घटवत्। तदवयवाः परमाणव एव। लोष्टादिष्ववयवेषु अणुत्वातिशयोऽवधिमान्, परिमाणातिशयत्वात् महत्त्वातिशयवत्। स च

नित्यः, निरवयवत्वाद् आकाशवत् । स च निरवयवः अल्पपरिमाणतारतम्यस्य अवधित्वात् । यत् सावयवं तदल्पपरिमाणतारतम्यं न भवति, यथा तन्त्वादयः । यद्वा स च निरवयवः, परिमाणतारतम्यस्य अवधित्वात् महत्त्वपरिमाणावधिभूतवत् । परमाणोस्संयोगः क्रियाजः, संयोगाजन्यत्वे सति संयोगत्वात् तन्तुतुरीसंयोगवत् । परमाण्वोराद्यं कर्म पुरुषविशेषगुणकारितं, नोदनाभिघातसंस्काराजन्यत्वे सति कर्मत्वात् पाणिकर्मवत् । परमाणूनामाद्यं कर्म सुखदुःखेच्छाद्वेषप्रयत्नसंस्कारेभ्यो व्यतिरिक्तपुरुषविशेषगुणकारितं, प्रयत्नादीनामभावे सति पुरुषगुणकारितत्वाद् । यदभावे यदुत्पद्यते तत्ततो व्यतिरिक्तकारणं, यथा तन्त्वाद्यभावे घटस्तद्व्यतिरिक्तजन्यः । तच्चादृष्टं स्वाश्रयसंयोगमपेक्ष्य आश्रयान्तरे कर्म आरभते, एकद्रव्यत्वे सति क्रियाहेतुत्वात् गुरुत्ववत् । परमाणूनामाद्यं कर्म अदृष्टवदात्मसंयोगादेव । ततश्च परस्परसंयोगः । स द्वितीयसंयोगस्य आश्रयः । संयुक्ताभ्यां द्वाभ्यां द्व्यणुकोत्पत्तिः । द्व्यणुकत्रयेण त्र्यणुकोत्पत्तिः । न द्वाभ्यां, महत्त्वानुपपत्तेः । त्रित्वनियमो लाघवात् । द्व्यणुकावयवस्य कार्यत्वे परिमाणतारतम्यानुपपत्तिः । अतस्तदवयवौ निरवयवाविति द्व्यणुकादिक्रमेण घटाद्युत्पत्तिः ।

स्नेहाश्रयं जलम् । रूपरसस्पर्शपरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहसंस्काराः त्रयोदश तस्य गुणाः । तस्य शौक्ल्यमेव रूपं, माधुर्यमेव रसः, शैत्यमेव स्पर्शः, स्वाभाविकमेव द्रवत्वं, अपाकजाश्च ते ।

तद्द्विविधं, परमाणुकार्यभेदात् । कार्यं द्विविधं इन्द्रियं विषयं च । इन्द्रियं रसनम् । विषयं च अब्धिहिमकरकादि । करकायाः काठिन्यं दृढसंयोगात् । गन्धादेरुपलम्भोऽन्यसम्पर्कात् । गुरुत्वं जलभूम्योरेव । स्नेहोऽम्भस्येव इति ।

भास्वररूपवत्तेजः । पररूपप्रकाशकं भास्वरमुच्यते ।

रूपस्पर्शपरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वसंस्कारा दश तेजोगुणाः ।

तेजोऽप्यणुकार्यभेदाद् द्विविधम् । इन्द्रियरूपं कार्यं चक्षुः ।

विषयश्चतुर्विधः भौमं दिव्यम् औदर्यम् आकरजं च ।

भौमं काष्ठेन्धनप्रभवम् ऊर्ध्वज्वलनस्वभावम् । दिव्यम् अबिन्धनं चन्द्रसूर्यादि । अशितपीताहारपरिणत्यर्थम् औदर्यम् । आकरजं सुवर्णादि । तस्य शौक्ल्यं भास्वरं च रूपम् । पाकनिमित्तं द्रवत्वम् । स्पर्शश्चौष्ण्यमेव । चन्द्रचामीकरादौ तु अन्यसंसर्गादनुपलम्भः । गुरुत्वादेः अन्यसंसर्गाद् उपलम्भ इति ।

Indira Gandhi National Centre for the Arts

अपाकजत्वे सति अनुष्णाशीतस्पर्शवान् वायुः । तस्य स्पर्शपरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वसंस्कारा अष्टौ गुणाः । तस्य युगपच्छीतोष्णादिविरुद्धधर्मविशिष्टस्य उपलम्भान्नानात्वं प्रत्यक्षं सम्मूर्छनादनुमेयमपि । सम्मूर्छनं पुनः समानजवयोः वाय्वोः विरुद्धदिक्क्रिययोस्सन्निपातः । सोऽपि वाय्वोरूर्ध्वगमनादनुमीयते । तदपि तृणादीनामूर्ध्वगत्यानुमीयते । प्रयोगस्तु – प्रतिहन्यमानाद् वायोः प्रतिहन्ता वायुरन्यः, तत्प्रतिहन्तृत्वादेवदत्ताद्यज्ञदत्तवत् । प्रतिहन्यते च अयं वायुः, अनूर्ध्वगमनशीलत्वे प्रयत्नाद्यसम्भवे सति ऊर्ध्वगमनत्वात् परस्पराभिहतनदीपयःपूरवत् । ऊर्ध्वगतिमानयं, तृणादीनामूर्ध्वगत्यसमवायिकारणसंयोगाश्रयत्वात् तथाविधज्वलनवत् । तृणाद्यूर्ध्वगमनं च स्पर्शवद्वेगवद्द्रव्यसंयोगजम्, अनूर्ध्वगमनस्य प्रयत्नाद्यसम्भवे सति ऊर्ध्वगमनत्वात्; ज्वलनप्रवर्तिततूलाद्यूर्ध्वगमनवत् ।

वायुरपि द्विविधः, अणुकार्यभेदात्। कार्यं तु त्रिविधम्, इन्द्रियं विषयः प्राण इति। स्पर्शोपलम्भकं त्वग् इन्द्रियम्। केशनखयोः तदभावादशरीरता। विषयस्तु शब्दकम्पनहेतुः तिर्यग्गमनस्वभावो मेघादिप्रेरणसमर्थः। प्राणोऽन्तश्शरीरे रसमलधातूनां प्रेरणादिहेतुः एकः। स पञ्चधा कार्यभेदात् पञ्च प्राणादिसंज्ञा लभते। मुखनासिकाभ्यां निष्क्रमणप्रवेशनात् प्राण इत्यादि।

नभः शब्दगुणम्। शब्दो गुणः, स्पर्शान्यत्वे सति बाह्यैकेन्द्रियग्राह्यत्वाद् रूपवत्। परिशेषान्नभ एव कारणम्। तस्य परिमाणपृथक्त्वसंयोगविभागशब्दाः पञ्च गुणाः।

आकाशो न प्रत्यक्षः, नीरूपत्वात् मनोवत्।

चिरादिविशिष्टप्रत्ययलिङ्गः कालः।

इतः प्रागित्यादिविशिष्टप्रत्ययलिङ्गा दिक्।

परत्वमपरत्वं च कार्यमागन्तुहेतुजम्।
विना दिक्कालयोर्योगमन्यथा नोपपद्यते ॥ ३ ॥

कालो न प्रत्यक्षः, नीरूपत्वान्मनोवत्। अनुमानं तु अस्य सत्त्वे प्रमाणम्। स्थविरादौ परत्वं तपनविप्रकर्षबुद्धिजन्यं, तदनुविधायित्वात् कुविन्दपटवत्। तपनपरिस्पन्दाः स्थविरशरीरसंबद्धाः तदवच्छेदकत्वात् पटावच्छेदकमाहारजतरागवत्। तेषां तत्सम्बन्धः तदाश्रयसंयुक्तद्रव्यद्वारकः, प्रकारान्तरासम्भवे सति सम्बन्धत्वात् पटे माहारजतरागसम्बन्धवत्। अन्यथा परत्वादिविशिष्टप्रत्ययानुपपत्तेः। तस्मात्तपनपरिस्पन्दानां स्थविरादिसम्बन्धद्वारभूतं द्रव्यं कालः।

तपनसंयोगानां मूर्त्तसम्बन्धे द्वारभूतं द्रव्यं दिक्। स्थविरादौ परत्वादेः तपनादिक्रियाया असमवायिकारणत्वाद्। अन्यत्र संयोगस्य असमवायिकारणत्वात्तेन तत्सिद्ध्यर्थं दिक्कालौ आश्रयणीयौ। तौ न

प्रत्यक्षौ, विशेषगुणरहितनित्यद्रव्यत्वान्मनोवत् । तयोः परिमाणपृथक्त्व-संयोगविभागाः चत्वारो गुणाः इति ।

बुद्ध्याद्याश्रयत्वं, भोक्तृत्वं, मितौ कर्तृत्वं वा आत्मनो लक्षणम् । तस्य परिमाणपृथक्त्वसंयोगविभागबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्म-संस्काराः त्रयोदश गुणाः । आकाशादिचतुर्णां परममहत्त्वं परिमाणम् । अतस्सर्वगतत्वाद् अमूर्तत्वं निरवयवत्वान्नित्यत्वं च अस्त्येव सामान्य-रहितत्वं च ।

आत्मव्यक्तयस्तु अनन्ताः । अन्येषामेकत्वमेवेति ।

द्रव्यानारम्भकत्वे सत्यणुद्रव्यं भवेन्मनः ।

अथवा —

सुखादेरापरोक्ष्यस्य साधनम्मन इन्द्रियम् ॥ ४ ॥
अयौगपद्यं तल्लिङ्गं ज्ञानानामक्षजन्मनाम् ।

विवादाध्यासिताः बुद्ध्यादयः संयोगासमवायिकारणकाः, नित्य-द्रव्यगतानित्यविशेषगुणत्वात् पार्थिवपरमाणुगतलौहित्यवत् । गुणि-नित्यत्वपक्षे बुद्ध्यादयो द्रव्यान्तरसंयोगाधीनसमवायाः नित्यद्रव्यगता-नित्यसमवायविशेषगुणत्वात् परमाणुलौहित्यवत् ।

परिशेषात्तद् द्रव्यं मनः । मनसोऽणुत्वमेव परिमाणं परिशेषादसर्व-गतत्वान्मूर्तत्वं च भवेत् तस्य । परिमाणपृथक्त्वसंयोगविभागपरत्वा-परत्ववेगाश्चेति सप्त मनसो गुणाः । आश्रयानन्तत्वाद् अनन्तत्वम् । एक-स्मिन्नेकमेव आत्मवत् । तत्तदवयवेषु सञ्चारणात्तदवयववेदनादिव्यवहारः । आत्मनस्तु प्रत्यक्षत्वमेव सम्मतम् अन्येषाम्, अनुमेयत्वमेव मनस इति ।

अत्र पृथिव्यादिवायुपर्यन्तानां प्रत्यक्षमेव प्रमाणम् ।

द्रव्यलक्षणं स्वात्मनि कार्यारम्भकत्वमिति वा ।

सांसिद्धिकद्रवत्वमपाकजरसाश्रयत्वं वा जलस्य लक्षणम् ।

स्पर्शान्तराभिव्यञ्जकस्पर्शवान् वायुरिति ।

निरवयवो द्रव्यैकसमवेतः प्रातिस्विकरूपेण नित्यद्रव्यवृत्तिः संयोगविभागयोः अनपेक्षतया अहेतुर्गुणः ।

द्रव्याश्रयी अगुणवान् संयोगविभागेषु अनपेक्षतया अहेतुर्गुण इति वा ।

बाह्येन्द्रियाणां मध्ये चक्षुर्मात्रं यद्ग्राहकं तद्रूपम् ।

यच्च रूपादन्यच्चाक्षुषं द्रव्यं गुणादि वा तत् सर्वं द्विबाह्येन्द्रियग्राह्यम् । नित्यानित्यद्रव्येष्वेकमेव रूपं नित्यं च । समवायमपेक्ष्य कार्यत्वव्यवहारः ।

Indira Gandhi National Centre for the Arts

रसनग्राह्यो रसः । स च द्विविधः पाकजसमवायोऽपाकजसमवायश्च । तदपि रूपवन्नेयम् । रूपरसादेरेकत्वं शौक्ल्यमाधुर्यादेः अनेकत्वेऽपि शब्दैकत्ववन्नेयम् ।

घ्राणग्राह्यो गन्धः । स तु द्विविधः सुरभिरसुरभिश्च । तस्यापि रूपवत् सर्वमुन्नेयम् ।

बाह्येन्द्रियाणां मध्ये त्वङ्मात्रग्राह्यो गुणः स्पर्शः । स च चतुर्विधः पाकजानुष्णाशीतस्पर्शः शीतस्पर्शः उष्णस्पर्शः अनुष्णाशीतस्पर्श इति । रूपरसस्पर्शसमवायानां यथासम्भवं जलादिकार्यद्रव्यत्रय समानकारणगुणसमवायपूर्वकत्वमेव; तदनुविधायित्वाद्, अन्यथातिप्रसङ्गात् । आश्रयनाशकारणादेव नाशः । जलादिषु परमाणुषु नित्यत्वमेव, संस्कारकत्वात् । पार्थिवपरमाणुषु तु अग्निसंयोगादेव उत्पत्तिविनाशौ । कार्यद्रव्ये तु समानकारणगुणसमवायाद् अग्निसंयोगाद् वा उत्पत्तिः । आश्रयनाशकारणाद् अग्निसंयोगाद् वा नाशः । द्रव्योत्पत्तिविनाशसम-

कालीनौ च रूपादिसमवायोत्पत्तिविनाशौ कारणगुणसमवायाद् आश्रयनाशकारणजन्यौ उन्नेयौ। तौ च समवायभावाभावाभ्यामाश्रयोत्पत्तिनाशाभ्यां विनैवानुमितौ पाकजावुन्नेयौ। अतः पाकेन रूपादिविनोत्पद्येत न घटोत्पत्तिः पूर्वघटस्य भिन्नानात्।

शब्दः श्रोत्रग्राह्योऽम्बरगुणो नित्यो व्याप्यवृत्तिर्नित्यसमवायः। स द्विविधः वर्णलक्षणोऽवर्णलक्षणश्च। अकारादिर्वर्णलक्षणः। शङ्खादिनिमित्तः अवर्णलक्षण इति।

मानव्यवहारहेतुर्गुणः परिमाणम्। तच्चतुर्विधं अणुत्वं महत्त्वं ह्रस्वत्वं दीर्घत्वं च इति। परस्परविरोधाद् एकत्र अणुत्वमहत्त्वयोः (अ)निवेशः तद्वद्ध्रस्वत्वदीर्घत्वयोः अन्यत्र। परमाणुद्व्यणुकयोरणुत्वमेव परिमाणं, द्व्यणुके ह्रस्वत्वं च। त्र्यणुकेषु महत्त्वदीर्घत्वे। खादिचतुष्टये परममहत्त्वदीर्घत्वे। मनसस्त्वणुत्वमेव। अणुत्वह्रस्वत्वदीर्घत्वपरममहत्त्वानि नित्यानि। एकत्वं चास्ति तेषाम्। परमाणुषु खादिषु च समवायो नित्यः अनेकश्च। द्व्यणुकादिषु तु समवायोऽनित्यः। त्र्यणुकादिषु तु महत्त्वस्य नित्यत्वमनेकत्वं च। द्व्यणुकत्र्यणुकयोः समवायारम्भकमवयवगतद्वित्वबहुत्वमेव। क्वचिन्महत्त्वमपि, क्वचित्प्रचयमपि, क्वचित्सहैव इति यथासम्भवं वेदितव्यम्। समवायस्य च नाश आश्रयनाशाद् वा समवायान्तराद् वा इति।

अपोद्धारव्यवहारहेतुर्गुणः पृथक्त्वम्। भेदादिशब्दसमानार्थत्वात् कार्यद्रव्येषु स्वरूपभेद एव पृथक्त्वम्। गुणादिष्विव तद्व्यवहारबुद्धिः। नित्येषु तु धर्म एव। अन्यथा व्यावृत्त्यसिद्धेः स एव विशेष इत्युच्यते। तेन नित्यानित्यसमवायानि अनन्ताश्च इति; एकत्वे भेदासिद्धेः द्विपृथक्त्वादि नास्त्येव; कार्यद्रव्येषु भेदातिरिक्तपृथक्त्वानभ्युपगमाद् इति।

युतसिद्धयोः प्राप्तिः (समवायः? संयोगः)। सम्बन्धिनोः परस्परविभागाश्रयत्वयोग्यता च युतसिद्धिरिति सामान्यलक्षणम्। नित्येषु तु सम्बन्धिनोर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं विशेषलक्षणम्। अनित्येषु तु सम्बन्धिनोः परस्परपरिहारेण पृथगाश्रयाश्रयित्वमिति।

घटपटौ संयुक्ताविव्यादिप्रत्ययश्च संयोगसद्भावे प्रमाणम्। पञ्चैको नित्यः अनित्यसमवायश्च। स च समवाय आश्रयाश्रयिभेदात् क्रियाभेदात् च भिद्यते। स च रूपादिवदेकद्रव्यनिष्ठो, न अनेकद्रव्यनिष्ठः; प्रत्ययस्य संयुक्तविषयत्वात्। स च त्रिविधः अन्यतरकर्मज उभयकर्मजः संयोगजश्चेति। यथा स्थाणुश्येनयोः, यथा मल्लयोः, यथा तुरीपटयोरिति। संयोगस्य च द्रव्यारम्भकत्वे चरमभाविद्रव्यापेक्षत्वं, गुणकर्मणोस्तत्सापेक्षत्वं, तत्समवायस्य च तदेकार्थसमवेताद् विभागाद् वा आश्रयविनाशकाद् वा विनाश इति।

संयोगघातकगुणो विभागः। घटपटौ च संयुज्य विभक्ताविव्यादि प्रत्ययश्च विभागसद्भावे प्रमाणम्।

विभागश्च त्रिविधः अन्यतरकर्मज उभयकर्मजो विभागजश्चेति। विभागजस्तु द्विविधः कारणविभागजः कारणाकारणविभागजश्च। आद्यः वेणुदलविभागजः खदलविभागः। कारणाकारणविभागजश्च अङ्गुलीतरुविभागजनकेन कर्मणा अङ्गुलीतरुविभागः तेन हस्ततरुविभाग इति। अङ्गुलीसमवेतस्य कर्मणः तत्र अकारणत्वात्। विभागश्च सर्वत्रैकोऽनित्यः अनित्यसमवायश्च क्रियाभेदादनेकश्च। स द्विष्ठः उत्तरसंयोगाद् आश्रयनाशाद् वा विनाशः।

परापराभिधाननिमित्तं परत्वापरत्वमिति लक्षणम्। अस्मादिदं परम् अस्मादिदमपरमिति अक्षजप्रत्ययो यथाक्रमं परत्वापरत्वसद्भावे प्रमाणम्। ते च प्रत्येकं द्विविधे दिक्कृतत्वकालकृतत्वभेदेन। ते नित्ये एकत्वे च।

समवायोत्पत्तिविनाशौ च समवायिकारणासमवायिकारणापेक्षाबुद्धिनाशात् पृथक् पृथक् कचित् द्वाभ्यां द्वाभ्यां कचित्सर्वेभ्यश्च इति सप्तधा विनाशः।

गुरुत्वं जलभूम्योः पतनासमवायिकारणम्। उत्क्षिप्तस्य यदूर्ध्व-

देशविभागपूर्वकमधोदेशसंयोगजनकं कर्म तत् पतनम् ॥

गुरुत्वं चातीन्द्रियम्। गुरुत्वं च संयोगप्रयत्नसंस्कारप्रतिबन्धेन पतनं जनयति। घोटारूढस्य संयोगात् पतनम्। प्रयत्नात् खेचरस्य श्येनादेः। वेगात्तु शरादेः। येषां तोलनतारतम्याद् गुरुत्वतारतम्यधीः तेषु प्रत्येकं गुरुत्वभेदः। येषु तु सा नास्ति तेष्वेकमेव गुरुत्वम्। पतनलिङ्गकानुमानेन गुरुत्वग्रहणम्। पतनं गुणासमवायिकारणकं कर्मत्वाद् नमनवद् इति वा। तद् रूपादिवन्नित्यम्। समवायस्तु नित्येषु नित्यः अनित्येषु कारणगुरुत्वसमवायजन्यः आश्रयविनाशैकविनाश्यश्च। लघुत्वव्यवहारो गुरुत्वतारतम्यात् न, गुणत्वरूपेण इति।

द्रवत्वं स्यन्दनकर्मसमवायिकारणम्। समदेशस्थितस्य यत् समनिम्नदेशान्तरेषु क्षरणं तत् स्यन्दनम्। तच्च न प्रयत्ननोदनादिजन्यं, तेन विनापि जायमानत्वात्। नापि प्रतिशिथिलावयवसंयोगजं तन्तुप्रचितावयवे द्वितूलादौ क्षरणानुत्पादात्। तेन द्रवत्वं नाम गुणान्तरं तदसमवायिकारणम्। तद्विविधं नैमित्तिकं सांसिद्धिकं च। तद्विशेषगुणः। अन्यत् साधारणम्। भेदोऽनुमेयः। समवायाभिप्रायेण द्वैविध्यं, तेनैकत्वं नित्यत्व च तस्य अस्ति। समवायस्य नित्यत्वमन्यत्वं च अस्ति जले। अन्यत्राग्निसंयोगादुत्पत्तिः तद्विनाशाच्च नाशः। अन्यत्र रसादिवत्। यत्तु हिमकरकादौ द्रवत्वानुपलम्भः तद्दिव्यतेजःसंयोगात्। वह्निसंयोगेन च लवणगतद्रवत्वप्रतिबन्धनात्। तेन घनीभूतावयवसंयोगात् करकादेः काठिन्यं, न स्वतः।

स्नेहः संग्रहमृजादिहेतुस्तदनुमेयः। संग्रहः परस्परमसंयुक्तानां सक्त्वादीनां पिण्डीभावप्राप्तिधारणाकर्षणहेतुः संयोगविशेषः। मृजा कायस्योद्वर्तनादिकृता विशुद्धिः। आदिशब्दान्मृदुत्व च तेषां हेतुः तैरनुमीयते। नापि द्रवत्वमात्रकृतं तद्धीनं काचकाञ्चनादेरिति; द्रवीभूतैरपि सक्त्वादिसङ्ग्रहानुत्पादात्। तेन स्नेहो नाम गुणान्तरम्। स च अपां विशेषगुणः। पार्थिवे तु तैलादावुपष्टम्भकजलगतस्यैव स्नेहस्य

संयुक्तसमवायादुपलम्भः शैत्यवत्। स्नेहस्यापि गुरुत्ववदेकत्वाद्युन्नेयम्।

संस्कारस्त्रिविधः वेगो भावना अलौकिकश्च। वेगो नाम मूर्तद्रव्यपञ्चकवृत्तिः नोदनादिनिमित्तविशेषमपेक्ष्याद्यकर्मज उत्तरकर्मानुमेयस्तद्धेतुः; नोदनकर्मसंयोगानां तदुत्पादकत्वासम्भवात्। तेनोत्तरकर्मासमवायिकारणतया यो गुणोऽनुमीयते स वेगः। तच्च नोदनादिसहितमाद्यं कर्म जनयति, न केवलं, मन्दगतौ वेगासम्भवात्। नियतदिक्क्रियासन्तानहेतुर्वेगः प्रायेण कर्मजः। क्वचित्कारणवेगजोऽपि, स्पर्शवद्द्रव्यसंयोगविनाश्यश्च। स च समवायाभिप्रायः। येषु तु प्रत्येकं द्रुतविलम्बिततरकृतो गतिकार्यभेदो लक्ष्यते तेषु तु प्रतिद्रव्यं वेगभेदः, येषु तु न लक्ष्यते तेषु त्वेक एव वेगो नित्यश्च सामान्यवत्।

भावनाख्यस्तु आत्मगुणोऽनुभवजन्योऽनुभूतेष्वर्थेषु स्मृतिप्रत्यभिज्ञानहेतुस्तदनुमेयः। स च सर्वात्मस्वेक एव लाघवात्। तेन जातिवन्नित्यत्वाद्युन्नेयम्। तस्य च ज्ञानव्यपदेशोऽस्ति। प्रतिभिन्नार्थस्मरणं संस्कारभेदोऽस्तु, न काचित् क्षतिः। वर्णोपलम्भजसंस्कारस्य भावनात्वे सत्यपि अर्थधीकार्याद् वैलक्षण्यमुन्नेयम्।

स्थितस्थापकस्तु नास्त्येव; पूर्वावस्थाप्राप(क)कर्मणः घनावयवसंयोगस्य कारणत्वसम्भवात्। तेन तदर्थं नानुमेयः संस्कार इति।

अलौकिकस्तु शब्दैकगम्यसमवायोत्पत्तिविनाशहेतुको नानाकरणद्रव्यवृत्तिप्रोक्षणादिजन्यः संस्कारः तन्त्रभागे विविक्तः।

अथ प्रतिबद्धव्यवहारानुकूलस्वभावः पुरुषस्य धर्मविशेषो बुद्धिरुपलब्धिर्ज्ञानं संविदिति व्यपदिश्यते। सा च यथार्था स्वप्रकाशा फलतोऽनुमेया विप्रतिपन्नबोधाय, सर्वात्मस्वभिन्ना। अहं बुध्ये अहं बुध्ये इत्यभिन्नाकारप्रत्ययात्। तत्समवायस्तु इन्द्रियादिहेतुभेदात् प्रत्यात्म प्रतिविषयं च भिद्यते। समवायापेक्षया तत्र व्यवस्थोपपत्तिः। तेनैका नित्या च। प्रत्यक्षादिव्यवहारश्च समवायकारणतः।

अनुग्राहकस्वभावं सुखम् । तद्ध्युत्पन्नमात्रं अनुकूलस्वभावतया स्वविषयमनुग्रहरूपमनुभवं कुर्वत् पुरुषमनुगृह्णाति इत्यनुग्राहकस्वभावम् । तच्च आत्ममनस्संयोगादुत्पद्यते । अतीतेषु स्मरणात् अनागतेषु सङ्कल्पाद् । दुःखाभावो न, वनितादिष्वपि ह्यनुभवदर्शनादिति ।

उपघातकस्वभावं दुःखम् । तद्धि उत्पन्नमात्रं प्रतिकूलस्वभावतया स्वविषयमनुभवं कुर्वत् पुरुषम् उपहन्तीत्युपघातकस्वभावम् । तच्चाधर्मसहितादात्ममनस्सन्निकर्षाच्च उत्पद्यते । अतीतेषु स्मृतिजमनागतेषु सङ्कल्पाद् । दुःखफलं दैन्यादि । सुखफलं विकासादि ।

स्वार्थं परार्थं वा अप्राप्तप्रार्थना इच्छा । अप्राप्तस्य वस्तुनः स्वं प्रति या प्रार्थना इदं मे भूयादिति, परार्थं वा या प्रार्थना अस्येदं भवत्विति सा इच्छा । सापि आत्ममनस्संयोगादुत्पद्यते सुखाद्यपेक्षात् स्मृत्यपेक्षाद्वा । अनागते हि सुखहेतौ इच्छोत्पद्यते, अतीते स्मृत्यपेक्षात् । इच्छाफलानि तु प्रयत्नस्मृतिधर्माधर्माः । कामादयोऽपि इच्छाभेदा एव ।

प्रज्वलनात्मको द्वेषः । यस्मिन् सति प्रज्वलितमिवात्मानं मन्यते स द्वेषः । स च आत्ममनसोस्संयोगाद् दुःखापेक्षात् तत्स्मृत्यपेक्षाद्वोत्पद्यते । तस्य फलं प्रयत्नधर्माधर्मस्मृतिरिति । क्रोधादिः द्वेषभेदः ।

प्रयत्नः संरम्भ उत्साह इति पर्यायाः । स द्विविधः जीवनपूर्वकः इच्छाद्वेषपूर्वकश्च । सदेहस्य आत्मनो विपच्यमानकर्माशयसहितस्य मनस्संयोगो जीवनम् । तत्पूर्वकप्रयत्नः सुप्तस्य प्राणापानक्रियासन्तानहेतुः । सुप्तस्य प्राणापानक्रिया हि प्रयत्नकार्या, प्राणापानक्रियात्वाद् जाग्रतः प्राणापानक्रियावत् । तस्य धर्माधर्मापेक्षाद् आत्ममनस्संयोगादुत्पत्तिः । इच्छाद्वेषपूर्वकप्रयत्नस्तु हिताहितप्राप्तिपरिहारयोग्यक्रियाहेतुः गुरुणोऽपि शरीरस्य आपततो धारणहेतुश्च । स च इच्छाद्वेषापेक्षादात्ममनस्संयोगादुत्पद्यते ।

विधायकवेदलक्षण आत्मगुणो धर्मः कर्तुस्सुखाभ्युदयमोक्षहेतुः । श्रेयस्करे हि धर्मशब्दः प्रसिद्धः । स च अपूर्वमेव । तत्साधने लाक्ष-

णिक इति शास्त्रभेदाद्भेदः । विशुद्धाभिसन्धिसापेक्षादात्ममनस्संयोगादुत्पत्तिः । अन्त्यफलज्ञानाद्विनाशः ।

अधर्मोऽपि पुरुषगुणः प्रतिषेधलक्षणः कर्तुरभिहितप्रत्यवायहेतुः । तस्य प्रतिषिद्धकर्मानुष्ठानविहिताकरणप्रमाददुष्टाभिसन्धिसापेक्षाद् आत्ममनस्संयोगादुत्पत्तिरिति ।

विभागसंयोगयोः अनपेक्षकारणं कर्म । तत् संयोगविभागानुमेयम् । कार्यभेदादनन्तता, मूर्तद्रव्यैकसमवेतता, एकद्रव्यवृत्तिद्रव्यकर्मणोरनारम्भकता, स्वाश्रयसमवेतकार्यारम्भकता, आशुतरविनाशिता, गुरुत्वद्रवत्वसंयोगवेगप्रयत्नादृष्टकारणकता, स्वकार्यसंयोगविनाश्यता च, आशुतरविनाशिसमवायिता च, एतानि साधर्म्याणि । विभागपूर्वकस्संयोगः कार्यः । तस्मात्संयोगविभागानपेक्षहेतुत्वाविधयैकमेव परिस्पन्दात्मकं कर्म । तद्विशेषा एव च उत्क्षेपणादय इति ।

नित्यमेकं प्रातिस्विकरूपेण अनित्यद्रव्यैकसमवेतं सामान्यम् । परापरत्वभेदाद् द्वैविध्यं नित्यत्वमेकत्वं च । समवायस्तु अनित्य इति ।

एकत्वादिप्रत्ययव्यवहारस्य हेतुस्सङ्ख्या । तत्रैकत्वद्वित्वत्रित्वादयो व्यक्तयो जातिवत् सर्वत्रैकैका नित्याश्च प्रतिभावं तासां भेदप्रमाणाभावात् । समवायास्तु प्रतिभावं भिन्नाः स्वीक्रियन्ते । तत्रैकत्वसमवाय एकाश्रयः । तद्धर्मिमात्राश्रय इति यावत् । स च नित्ये नित्यः अनित्ये भावहेतुजः, आश्रयनाशकादेव नश्यति । द्वित्वसमवायस्तु अनेकाश्रयः । धर्म्यन्तरसहितधर्म्याश्रय इति यावत् । स तु सर्वत्र अपेक्षाबुद्धिजन्यत्वादनित्यः । तन्नाशादाश्रयनाशकाद् वा विनश्यति । अपेक्षाबुद्धिर्नाम महासङ्ख्यावगत्यपेक्षासहितं तदाश्रयगतैकत्वसामस्त्यज्ञानमिष्यते । द्वित्वोत्पादिकाया हि अपेक्षाबुद्धेरेकान्तरसहितमेकत्वं विषयः । त्रित्वोत्पादिकायास्तु त्रिसहितमेकत्वं विषयः । एवं सर्वत्र ।

एषा चात्र दर्शनप्रक्रिया – इन्द्रियसन्निकर्षः, ततः एकत्वज्ञानं, ततोऽपेक्षाज्ञानं, ततो द्वित्वोत्पादः, ततो द्वित्वज्ञानं, ततो द्वित्व-

विशिष्टद्रव्यज्ञानं, ततस्संस्कार इत्युत्पादक्रमः । विनाशप्रक्रमस्तु, अपेक्षाबुद्धितो द्वित्वोत्पत्तिसमकालं एकत्वबुद्धेर्विनाशः, द्वित्वबुद्धितो द्रव्यबुद्धिसमकालमपेक्षाबुद्धेर्विनाशः, द्रव्यबुद्धितो द्वित्वबुद्धेर्विनाशः, संस्कारस्योत्पादः अपेक्षाबुद्धिविनाशाच्च द्वित्वनाश इत्येकः कालः; संस्काराद्द्रव्यबुद्धेर्विनाश इति । तत्र च प्रमाणं संस्कारे द्वित्वविशिष्टद्रव्यस्मरणं, द्रव्यज्ञानेऽनुव्यवसायः, द्वित्वज्ञाने तद्विशिष्टद्रव्यज्ञानं, द्वित्वे तज्ज्ञानम्. अपेक्षाबुद्धौ तत्कार्यमेकत्वज्ञाने अपेक्षाबुद्धिः, इन्द्रियसन्निकर्षे च एकत्वज्ञानमिति विवेक्तव्यम् । यदा च द्वित्वबुद्धिसमकालमेव द्रव्यनाशः तदा तत्कालमाश्रयनाशादेव द्वित्वनाश इति । गुणव्यतिरिक्तत्वं गुणकर्मणोः समवायात् । प्रत्यक्षद्रव्येषु प्रत्यक्षा, गुणादिषु च अनुमेया । संख्या न गुणः, गुणकर्मणोराश्रितत्वाच्छक्तिवत् ।

सर्वभावानां कार्यानुमेया शक्तिः ।

तत्कारकदशातोऽग्निः कारकत्वदशासु हि
प्राप्तातिशयसम्बन्धः कारकत्वाद् यथा पुमान् ॥

सादृश्यज्ञानात् सदृशविषयधीरुपमा । तद्विषयत्वं सादृश्यम् ।

अयुतसिद्धानामाधार्याधारभूतानां विशेषणविशेष्यभावधीहेतुः यः सम्बन्धः स समवायः । सोऽनुमेय एव । प्रयोगस्तु, समवायोऽनुमेय इन्द्रियसम्बन्धरहितत्वात् कर्मवत् । संयोगव्यतिरिक्तत्वे अवयवावयव्यादयः परस्परमसंबन्धसंयोगरहिता तद्व्यापकरहितत्वाद् यदित्थं तत्तथा यथा धूमव्यापकाग्निरहितो महाह्रदो धूमरहित इति । समवायश्चानेकः । समवायिनोरेकस्योभयोर्वा अनित्यत्वे अनित्यः नित्ययोर्नित्यः । इति पदार्थाः समाप्ताः ।

॥ श्रीः ॥

नारायणप्रणीतः

# कौमारिलमतोपन्यासः

गुरोरपि गुरोः कुमारिलाचार्यस्य तु मते -

धर्मो यागादिरूपः स तु सुरनगरप्राप्तिपश्वादिलाभे
हेतुः कुर्वन्नपूर्वं निगमवचनमेवाखिलं तत्र मानम् ।
नित्यान्येतानि सर्वाण्यपि न तु विहितानीश्वरेणापरैर्वा
प्रामाण्यस्य स्वतस्त्वं भवति च निखिलानां च मानान्तराणाम् ॥१॥

Centre for the Arts

प्रमाकरणमेवात्र प्रमाणं तर्कपक्षवत् ।
प्रमा चाज्ञाततत्त्वार्थज्ञानमित्येव भिद्यते ॥ २ ॥

अज्ञातशब्दस्याभावे तत्र स्मृत्यनुवादयोः ।
प्रमाणत्वं प्रसज्येत विज्ञातविषयौ हि तौ ॥ ३ ॥

धारावाहिकविज्ञानं घटादेरुत्तरोत्तरम् ।
सद्भावं बोधयत् प्राज्ञैः प्रमाणमिति गीयते ॥ ४ ॥

उत्तरक्षणसद्भावो न हि पूर्वेण बोधितः ।
प्राकट्योपहितानां तु कालांशानां न सूक्ष्मता ॥ ५ ॥

प्रत्यक्षत्वं च कालस्य प्राकट्यानामसूक्ष्मता ।
ज्ञानस्य तद्गम्यत्वं च सिद्धं कौमारिले मते ॥ ६ ॥

तस्मादौपाधिकं सौक्ष्म्यं कालांशे नोपलभ्यते ।
ज्ञा(ना ? न)भेदो न विद्येत नलिनीदलवेधवत् ॥ ७ ॥

तत्त्वशब्दो यथार्थार्थवाचकस्तेन च स्फुटम् ।
शुक्तिकारजतज्ञानप्रामाण्यं विनिवार्यते ॥ ८ ॥

केचित् सर्वमपि ज्ञानं प्रमाणमिति मन्वते ।
ततस्तत्त्वपदं व्यर्थमित्याहुस्तन्मते ब्रुवे ॥ ९ ॥

सन्दृष्टे शौक्ल्यभाजि स्फुरति च पुरतो भास्वरे शुक्तिखण्डे
दुर्वर्णे तुल्यवर्णे स्मरणमपि भवेदाशु देशान्तरस्थे ।
भेदज्ञानव्यपायादिह भवति तयोश्शुक्तिकायां प्रवृत्ति-
र्दुर्वर्गाभ्यर्थिनामप्यखिलमपि ततो ज्ञानसार्थं यथार्थम् ॥ १० ॥

तयोर्भेदग्रहादेव निवृत्तिश्च भविष्यति ।
शुक्तेस्तु रजतत्वेन प्रतीतिर्न ततः क्वचित् ॥ ११ ॥

अयुक्त एव मार्गोऽयमिदमो रजतस्य च ।
सामानाधिकरण्येन प्रतीतिरिह जायते ॥ १२ ॥

इदं रजतमेवेति स्फुटा विगतसंशया ।
सा भेदाग्रहमात्रेण कथङ्कारं भविष्यति ॥ १३ ॥

इदमो रजतत्वेन प्रतीतिर्नोदिता यदि ।
नेदं रजतमित्येवं बाधधीर्जायते कथम् ॥ १४ ॥

तस्मादज्ञाततत्त्वार्थज्ञानसाधनमेव हि ।
प्रमाणमिति निर्णीतं तद्विशेषोऽभिधीयते ॥ १५ ॥

प्रत्यक्षमनुमानं च शाब्दं चोपमितिस्तथा ।
अर्थापत्तिरभावश्च षट् प्रमाणानि तन्मते ॥ १६ ॥

चार्वाकास्तावदेकं द्वितयमपि पुनर्बौद्धवैशेषिकौ द्वौ
भासर्वज्ञश्च साङ्ख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति ।
प्राहुः प्राभाकराः पञ्चकमिह तु पुन र्भाट्टवेदान्तविज्ञाः
षट्कं पौराणिकास्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात् ॥ १७ ॥

तेषां विशेषलक्षणे सूत्रकारो वृत्तिकारश्च – "तत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म सत् प्रत्यक्षम्" ।

धर्मे वेदाः प्रमाणं स्युरिति भाष्यकृतोदिते ।
परीक्षितव्यं तन्मानं किं वा नेति विचारणे ।
परीक्षितव्यं नैवेति वृत्तिकारेण कथ्यते ॥ १८½ ॥

Indira Gandhi National Centre for the Arts

प्रत्यक्षादेः प्रसिद्धत्वात् तदन्तर्भावभावतः ।
प्रसिद्धमेव शास्त्रस्य प्रामाण्यं किं परीक्षया ॥ १९½ ॥

ननु प्रत्यक्ष एवात्र व्यभिचारो (हि) दृश्यते ।
शुक्तिका रजतत्वेन प्रत्यक्षाद् गृह्यते यतः ॥ २०½ ॥

तस्माद् व्यभिचरत्येव प्रमाणं तत्पुरस्सरः ।
प्रत्यक्षाभास एवायमिति चेत्तस्य लक्षणम् ॥ २१½ ॥

प्रत्यक्षस्यात्र वक्तव्यं तदाभासस्य च स्फुटम् ।
इति शङ्कोत्तरत्वेन सूत्रमेवमुदाहृतम् ॥ २२½ ॥

तत्सतोर्व्यत्ययश्चात्र सूत्रे वृत्तिकृता कृतः ।
आभाससङ्कराप्राप्त्यै तदेषोऽर्थो भविष्यति ॥ २३½ ॥

संप्रयोगः सन्निकर्षः स तु भाट्टमते द्विधा ।
विषयाश्चक्षुरादीनां सर्वे द्रव्यगुणादयः ॥ २४ १/२ ॥

ग्राह्याः संयोगसंयुक्ततादात्म्याभ्यामिति स्थितिः ।
गुणत्वादेस्तु तादात्म्यं पारम्पर्येण सिद्ध्यति ॥ २५ १/२ ॥

इत्थं सूत्रकृता प्रोक्ता लोकसिद्धे न लक्षणा ।
तत्संप्रयोगजत्वेन प्रत्यक्षाव्यभिचारिता ॥ २६ १/२ ॥

तद्वदेवानुमानादेर्वक्तुमव्याभिचारिताम् ।
लक्षणं वृत्तिकृत् प्राह सूत्रकृद्धृदयस्थितम् ॥ २७ १/२ ॥

“अनुमानं ज्ञातसंबन्धस्यैकदेशदर्शनादेकदेशान्तरेऽसन्निकृष्टेऽर्थे बुद्धिः” ।

असन्निकृष्टवाचा च द्वयमत्र जिहासितम् ।
ताद्रूप्येण परिच्छित्तिस्तद्विपर्ययतोऽपि वा ॥ २८ १/२ ॥

“शास्त्रं शब्दविज्ञानादसन्निकृष्टेऽर्थे विज्ञानम्” ।

लौकिकं वैदिकश्चेति शाब्दं तस्य मते द्विधा ।
आप्तवाक्यन्तु तत्राद्यमन्यद् वेदवचो मतम् ॥ २९ १/२ ॥

“उपमानमपि सादृश्यमसन्निकृष्टेऽर्थे बुद्धिमुत्पादयति । यथा गवयदर्शनं गोस्मरणस्य । अर्थापत्तिरपि दृष्टः श्रुतो वाऽर्थोऽन्यथा नोपपद्यते इत्यर्थकल्पनम् । यथा जीवतो देवदत्तस्य गृहाभावदर्शनेन बहिर्भावस्यादृष्टस्य कल्पनम्” ।

अत्र दृष्टः श्रुतो वेति ग्रन्थे वृत्तिकृदुक्तितः ।
श्रुतार्थापत्तिमन्यामप्यङ्गीचक्रुः कुमारिलाः ॥ ३० १/२ ॥

Centre for the Arts

उपलब्धार्थवाचित्वं द्वयोः संभूय कल्पयन्।
अत्रार्थापत्तिरेकैव युक्तेत्याह प्रभाकरः॥ ३१ १/२ ॥

उपलब्धोऽर्थ इत्येव प्रयोगे सुगमे सति।
तदर्थत्वे कथं तेन प्रयुज्येत पदद्वयम्॥ ३२ १/२ ॥

यत्र त्वपरिपूर्णस्य वाक्यस्यान्वयसिद्धये।
शब्दोऽध्याह्रियते तत्र श्रुतार्थापत्तिरिष्यते॥ ३३ १/२ ॥

यथा द्वारमिति प्रोक्ते शब्दो निव्रियतामिति।
उपपत्त्यनुसारेण क्वचिदाव्रियतामिति॥ ३४ १/२ ॥

तत्र च शब्देन सहैवावरणाद्यर्थकल्पनोद्युक्तः।
शब्दादेवार्थगतेर्लाघवतः शब्दमेव कल्पयति॥ ३५ १/२ ॥

अर्थापत्तिरियं त्वन्या शब्दो यत् कल्प्यतेऽनया।
तत्राप्यावरणाद्यर्थकल्पनैव गुरोर्मते॥ ३६ १/२ ॥

घटते तन्न शाब्दस्य शाब्देनैवान्वयो यतः।
न हि गामानयेत्युक्ते दृष्टाश्वानयनं क्वचित्॥ ३७ १/२ ॥

प्रकृतौ सूर्यशब्दस्य श्रवणे विकृतौ पुनः।
ऊहस्त्वग्न्यादिशब्दानां तन्मते संभवेत् कथम्॥ ३८ १/२ ॥

न हि तत्रार्थमात्रस्यैवोह इत्युपपद्यते।
अर्थाध्याहार एवेति निर्बाधो येन लभ्यते॥ ३९ १/२ ॥

व्यवस्थेयं न मन्त्रत्वादुपपन्नेति युज्यते।
ऊहप्रवरनाम्नां यदमन्त्रत्वं व्यवस्थितम्॥ ४० १/२ ॥

"अभावोऽपि प्रमाणाभावो नास्तीत्यस्यार्थस्यासन्निकृष्टस्य" ।

इह भवति शतादौ संभवाद्या सहस्रा-
न्मतिरविच्युतिभावात् सानुमानादभिन्ना ।
जगति बहु न सत्यं नित्यमैतिह्यमुक्तं
भवति तु यदि सत्यं नागमाद् भिद्यते तत् ॥ ४१ १/२ ॥

द्रव्यं जातिर्गुणः कर्माप्यभावं चेति पञ्चधा ।
प्रमेयं विभजन्त्येते कुमारिलमतानुगाः ॥ ४२ १/२ ॥

पृथिवी सलिलं तेजः पवमानस्तमस्तथा ।
व्योमकालदिगात्मानो मनः शब्द इति क्रमात् ॥ ४३ १/२ ॥

एकादशविधं द्रव्यं कुमारिलमते मतम् ।
आद्यानि पञ्चावयविद्रव्याण्यन्यानि षट् पुनः ॥ ४४ १/२ ॥

व्योमकालदिगादीनि नित्यानि च विभूनि च ॥ ४५ ॥

जालरन्ध्रविसरद्रवितेजोजालभासुरपदार्थविशेषात् ।
अल्पकानिह पुनः परमाणून् कल्पयन्ति न कुमारिलशिष्याः ॥ ४६ ॥

आलोकाभावमात्रं स्यात्तम इत्यपरे जगुः ।
तन्मन्दं नह्यभावेऽस्ति रूपवत्त्वं कदाचन ॥ ४७ ॥

कळायकोमळच्छायं दर्शनीयं भृशं दृशाम् ।
तमः कृष्णं विजानीयाद् आगमप्रतिपादितम् ॥ ४८ ॥

नीलादिरूपयुक्तस्य स्पर्शवत्त्वं च दृश्यते ।
स्पर्शाभावान्न रूपि स्यात्तम इत्यप्यपेशलम् ॥ ४९ ॥

स्पर्शयुक्तस्य सर्वत्र रूपवत्त्वं च दृश्यते।
रूपाभावेन वायोरप्यस्पर्शत्वप्रसंगतः ॥ ५० ॥

गुणकर्मादिसद्भावादस्तीति प्रतिभासतः ।
प्रतियोग्यस्मृतेश्चैव भावरूपं ध्रुवं तमः ॥ ५१ ॥

कर्मदिक्कालवियतां प्रत्यक्षज्ञानगम्यताम् ।
अङ्गीकुर्वन्ति ते सर्वे कुमारिलमते स्थिताः ॥ ५२ ॥

कौमारिलानामेवास्ति मनसो वैभवं भुवि ।
तथा शब्दविभुत्वं च तस्य द्रव्यत्वनित्यते ॥ ५३ ॥

इत्थं भावपदार्थानां स्वरूपे सुनिरूपिते।
अभावाख्यं पदार्थं च पञ्चमं चिन्तयामहे ॥ ५४ ॥

प्रागभावादिभेदेन चतुर्धैव विभागवान् ।
षष्ठप्रमाणविज्ञेयः पदार्थोऽभाव उच्यते ॥ ५५ ॥

क्षीरे यो दध्यभावः स इह निगदितः प्रागभावः प्रवीणैः
प्रध्वंसाभावमाहुर्दधिनि तु पयसोऽभावमाचार्यपादाः ॥
अत्यन्ताभावसंज्ञो भवति च पवनाद्येषु रूपाद्यभाव-
श्चान्योन्याभावसंज्ञो भवति ननु घटादौ पटत्वाद्यभावः ॥ ५६ ॥

अभावाख्यं तु वस्त्वेव नास्तीत्याह प्रभाकरः ।
घटाद्यभावस्तत्पक्षे केवलं भूतलं मतम् ॥ ५७ ॥

तत्र केवलशब्दार्थः कस्तावदिति चिन्त्यताम् ।
किं वा स भूतलादन्यो यद्वा भूतलमेव सः ॥ ५८ ॥

तत्रास्य भूतलान्यत्वे भवेद् वस्त्वन्तरात्मता ।
वस्त्वन्तरे विमृष्टे तस्याभावात्मकतापतेत् ॥ ५९ ॥

भूतलानतिरिक्तत्वे सघटे घटनास्तिधीः ।
द्रव्यादीनां पदार्थानां यथार्थत्वावधारणे ॥ ६० ॥

सामर्थ्यं यत् प्रमाणानां प्रामाण्यं तदुदाहृतम् ।
अत्र प्रामाण्यविषये वादिनो बहुधा जगुः ॥ ६१ ॥

वदन्ति साङ्ख्याः प्रामाण्यमप्रामाण्यमपि स्वतः ।
उभयं परतः प्राहुरक्षपात्पक्षिलादयः ॥ ६२ ॥

अप्रामाण्यं स्वतस्तत्र प्रामाण्यं परतो विदुः ।
बौद्धा मीमांसकास्तत्र प्रामाण्यं तु स्वतो विदुः ॥ ६३ ॥

Indira Gandhi National Centre for the Arts

अप्रामाण्यं तु परत स्तत्र चिन्ता विधीयते ।
प्रामाण्यमप्रामाण्यं च द्वयं नैकत्र युज्यते ॥ ६४ ॥

तयोर्विरोधादन्योन्यं पयःपावकयोरिव ।
ज्ञानमेकं प्रमाणं स्यादप्रमाणमिहापरम् ॥ ६५ ॥

इति दृष्टा (व्यवस्था सा) तन्मते सम्भवेत् कथम् ।
करणादिगुणात् क्वापि प्रामाण्यमुपजायते ॥ ६६ ॥

तेषां दोषात्तु विज्ञाने क्वाप्यप्रामाण्यमापतेत् ।
उभयं परतस्तस्मादिति पक्षोऽप्युपेक्ष्यताम् ॥ ६७ ॥

निःस्वभावत्वमेवं हि ज्ञानरूपं प्रसज्यते ।
विज्ञानस्य स्वरूपञ्च न हि व्यक्तिद्वयादृते ॥ ६८ ॥

स्वतः सन्देहरूपत्वेऽप्यप्रामाण्यं स्वतो भवेत् ।
सन्देहस्याप्रमाणत्वं यतस्तेषां मते मतम् ॥ ६९ ॥

तयोरन्यतरत्तस्मात् स्वाभाविकमिति स्थितम् ।
एकं हेत्वन्तराधीनं किं तदित्यत्र चिन्त्यते ॥ ७० ॥

ज्ञानानामप्रमाणत्वस्वरूपे निश्चिते सति ।
सौगतानां कुतस्तेषां पश्चात् प्रामाण्यनिश्चयः ॥ ७१ ॥

यदि त्वर्थक्रियाज्ञानात्तर्हि स्यादनवस्थितिः ।
तस्याप्यर्थक्रियाधीनो यतः प्रामाण्यनिश्चयः ॥ ७२ ॥

अन्योन्यार्थक्रियायामिति तु बहुतरं कल्पितायामतीत-
ज्ञानप्रामाण्यबोधो जगति युगशतैरप्यहो लभ्यते किम् ।
प्रामाण्यानिश्चये च क्वचिदपि न भवेत् कस्यचिद्वा प्रवृत्ति-
स्तस्मादर्थक्रिया वा कथमिव भविता पूर्वमेव प्रवृत्तेः ॥७३॥

प्रवृत्तिर्निश्चयाधीना तदधीनश्च निश्चयः ।
परस्पराश्रयोऽप्येवं सौगतानां प्रसज्यते ॥ ७४ ॥

किञ्चात्रार्थक्रियाज्ञानाद् भवेत् प्रामाण्यनिश्चयः ।
प्रामाण्यनिश्चयाधीना प्रवृत्तिश्च भविष्यति ॥ ७५ ॥

प्रवृत्त्यधीना ज्ञानानां भवेदर्थक्रियास्थितिः ।
इति बुद्धमते सिद्धं चक्रकं दुरतिक्रमम् ॥ ७६ ॥

कृष्यादावपि सन्देहात् प्रवृत्तिर्नोपलभ्यते ।
यतोऽस्ति प्रावृडारम्भे वर्षारम्भस्य निश्चयः ॥ ७७ ॥

यथा तु ग्रहदोषेण वृष्टिस्तत्र विरुद्धचते ।
तथा करणदोषेण प्रामाण्यञ्चेति सिद्धचति ॥ ७८ ॥

तस्मात् सर्वप्रमाणानां प्रामाण्यं स्वत एव हि ।
अप्रामाण्यं तु परतो जायते ज्ञायतेऽपि वा ॥ ७९ ॥

दोषेण करणादीनामप्रामाण्यमिति स्थिते ।
अपौरुषेये वेदे स्याद् दोषाभावात् प्रमाणता ॥ ८० ॥

सिद्धं च वेदवाक्यत्वं सामर्ग्यजुरथर्वणाम् ।
अङ्गोपाङ्गोपवेदानामाप्तोक्तित्वात् प्रमाणता ॥ ८१ ॥

वेदवाक्यं द्विधा चेष्टं मन्त्रब्राह्मणभेदतः ।
तत्र मन्त्रा बहुविधा अनुष्ठेयार्थबोधकाः ॥ ८२ ॥

केचित्तु प्रार्थनार्थाः स्युर्देवतास्तावकाः परे ।
द्विधा ब्राह्मणवाक्यं स्यात् सिद्धार्थं च विधायकम् ॥ ८३ ॥

तत्रार्थवादाः सिद्धार्थास्तथोपनिषदोऽपि हि ।
उपदेशातिदेशाभ्यां द्विधा वाक्यं विधायकम् ॥ ८४ ॥

इत्थं कर्तव्यमित्येवमुपदेशः प्रवर्तते ।
तद्वत् कर्तव्यमित्येवमतिदेशः प्रकीर्तितः ॥ ८५ ॥

भावने द्वे च विद्येते वाक्ये तत्र विधायके ।
स्याच्छब्दभावनात्राद्या द्वितीया त्वर्थभावना ॥ ८६ ॥

आद्या शब्दात्मिका तत्र लिङाद्यर्थतया स्थिता ।
अर्थात्मिका भावनान्या सर्वाख्यातेषु विद्यते ॥ ८७ ॥

किं केन कथमित्येवं सा स्यादंशत्रयात्मिका ।
अर्थात्मिकायां तत्रैवमभिधानं प्रवर्तते ॥ ८८ ॥

स्वर्गकामादिवाक्येषु लिङोऽर्थो भावयेदिति ।
किं भावयेदित्याकाङ्क्षां स्वर्गशब्दोऽत्र पूरयेत् ॥ ८९ ॥

यजतिस्तु प्रकृत्यर्थः केनेत्यंशं च पूरयेत् ।
अङ्गोपाङ्गादिवाक्यन्तु कथमंशस्य पूरकम् ॥ ९० ॥

यागानन्तरमेवात्र स्वर्गप्राप्तेरदर्शनम् ।
साधनत्वश्रुतिश्चास्य विरुध्येते परस्परम् ॥ ९१ ॥

इति तन्मूलभूतात्र श्रुतार्थापत्तिरुत्थिता ।
शब्दं कल्पयति स्पष्टं कृत्वापूर्वमितीदृशम् ॥ ९२ ॥

ज्योतिष्टोमेन यागेन कल्पसूत्रोक्तवर्त्मना ।
कृत्वापूर्वं फलं स्वर्गं भावयेद् वेदपारगः ॥ ९३ ॥

Centre for the Arts

स्वर्गकामादिवाक्यानामित्थमर्थं वदन्ति ते ।
मृद्दण्डादीन्युपादाय भावयन्ति मृदा घटम् ॥ ९४ ॥

कुलाला, इति सर्वत्र योजयेद् भावनामिमाम् ।
शब्दात्मिकायास्तत्रैवं कर्तव्या त्वर्थवर्णना ॥ ९५ ॥

प्रवृत्तिः पुरुषस्यैषा भाव्यत्वेनावकल्पते ।
भावनाया लिङादेश्च वाच्यवाचकलक्षणः ॥ ९६ ॥

यः संबन्धः स करणं केनेत्यंशस्य पूरकम् ।
कर्मप्रशंसाभिरलं प्रवृत्तावुत्पादयन्तो रुचिमर्थवादाः ।
ये भावनायामिह कुर्वते ते शब्दात्मिकायाश्चरमांशपूर्त्तिम् ॥ ९७ १/२ ॥

नन्वर्थापत्तिरेवास्तु धर्माधर्मावधारणे ।
प्रमाणमिति किं तत्र वेदप्रामाण्यचिन्तया ॥ ९८ १/२ ॥

कश्चित् सुखी भवति कश्चन दुःखजालं
भुङ्क्ते पुमानिति जगत्तु विचित्ररूपा ।
दृष्टा यदत्र जनता व्यभिचारहीनं
मूलं विना नहि भवेदुपपत्तिमत्तत् ॥ ९९ १/२ ॥

जगद्वैचित्र्यमेवं हि दृश्यमानं दिवानिशम् ।
तन्मूलं कल्पयेद्धर्मश्चाधर्मश्च न संशयः ॥ १०० १/२ ॥

सत्यं यत्किञ्चिदस्तीति विज्ञानं जायते तया ।
किन्तु यागादितो दुःखं हिंसादेः किं सुखोदयः ॥ १०१ १/२ ॥

इत्यादिचिन्तासन्तानं को वा वारयितुं क्षमः ।
तस्माद्भाववक्त्रस्थौ धर्माधर्मौ न संशयः ॥ १०२ १/२ ॥

चोदना चेत् समुद्धर्तुं ग्र(स्तौ ? स्तां) तेनैव पश्य ताम् ।
तस्माद्वेदोक्त एवार्थो धर्म इत्यवधार्यताम् ॥ १०३ १/२ ॥

अधर्मः प्रतिषिद्धोऽर्थस्तत्फलं रौरवादयः ।
श्रुतिषु प्रतिषिद्धानां विहितानां च कर्मणाम् ॥ १०४ १/२ ॥

आत्मैव फलभोक्ता स्यात्तत्स्वरूपं निरूप्यते ।
स तु देहेन्द्रियज्ञानसुखेभ्यो व्यतिरिच्यते ॥ १०५ १/२ ॥

नानाभूतो विभुर्नित्यो भोगस्वर्गापवर्गभाक् ।
नाङ्गीकुर्वन्ति चार्वाकाश्शरीरव्यतिरेकिणम् ॥ १०६ १/२ ॥

आत्मानं स्थौल्यकार्श्यादिप्रतीत्यनुपपत्तितः।
स्थूले शरीरे स्थूलोऽहं कृशोऽहमिति वान्यथा ॥ १०७ १/२ ॥

लोकानां जायमाना धीर्युज्यते कथमन्यथा।
किं च धावामि गच्छामि तिष्ठामीत्यादिबुद्धयः ॥ १०८ १/२ ॥

लोकप्रसिद्धदेहस्यैवात्मत्वं साधयन्ति हि।
तदप्ययुक्तं दृश्यन्ते लोके जातिस्मरा नराः ॥ १०९ १/२ ॥

ते हि जन्मान्तरकृतं स्मरन्ति कृतमात्मना ॥ ११० ॥

देहे तेषां विनष्टे विरतिमुपगतेष्वेव बाह्येन्द्रियेषु
स्मर्यन्ते तैरतीते जनुषि खलु रहोवृत्तवार्त्ताः समस्ताः।
देहाद् बाह्येन्द्रियेभ्योऽप्यपर इति ततः कल्प्यतां सोऽयमात्मा
तज्ज्ञाने साधनस्य स्फुटमिह मनसो (मा) नता साधनीया ॥ १११ ॥

अनुमानेन वेदान्तवचसा मनसा तथा।
अर्थापत्त्या च विज्ञेयः सोऽयमात्मेति तन्मतम् ॥ ११२ ॥

तस्मात् स्थूलोऽहमित्यादिबुद्धिरात्मशरीरयोः।
जातसंसर्गमात्रेण तोयौष्ण्यप्रत्ययादिवत् ॥ ११३ ॥

भेदेन व्यवहारोऽपि लोकेष्वात्मशरीरयोः।
दृश्यते हि शरीरं मे क्षीणमित्यादिषु स्फुटम् ॥ ११४ ॥

न च विज्ञानमेवात्मा यतः क्षणिकमेव तत्।
अजानन्नहमस्त्राप्समेतावन्तमनेहसम् ॥ ११५ ॥

इति बुद्ध्यैव विध्वस्ता ज्ञाननित्यत्ववादिनः।
आत्मनो यस्य मे पूर्वं सुखमासीत् स एव तु ॥ ११६ ॥

इदानीं दुःखितोऽस्मीति बुद्ध्या सिद्धा च नित्यता ।
आत्मनः सुखरूपत्वं निरस्तमनया दिशा ॥ ११७ ॥

सुखस्य सन्निवृत्तावप्यात्मावस्थानसाधनात् ।
सोऽयमात्मा प्रतिक्षेत्रं भिन्नः कौमारिले मते ॥ ११८ ॥

एकत्वे पुनरेकस्मिन् सुखिते दुःखितेऽपि वा ।
सर्वेऽपि सुखिता एव भवेयुर्दुःखिताश्च वा ॥ ११९ ॥

अपि चात्मन एकत्वे चरणे कस्यापि कण्टके लग्ने ।
उद्धरणे व्यापारं सर्वजना युगपदस्य कुर्वीरन् ॥ १२० ॥

तदभावः शरीरादेरन्यत्वेन न युज्यते ।
सुखदुःखोपभोगस्य शरीरादिष्वसंभवात् ॥ १२१ ॥

दुःखानुभव एकस्य हेतुः करतलार्पणे ।
अचेतनानां देहेन्द्रियादीनां स कथं भवेत् ॥ १२२ ॥

न जीवभेदस्तद्धेतुः जगदेतच्चराचरम् ।
अभिन्नं मन्यमानस्य जीवभेदः कुतस्तराम् ॥ १२३ ॥

तस्मादात्मा प्रतिक्षेत्रं भिन्न एवेति सुस्थितम् ।
तस्यात्मनो विभुत्वे च नित्यत्वे च श्रुतिः प्रमा ॥ १२४ ॥

को वा निवारयेदर्थमागमप्रतिपादितम् ।

ब्रह्मद्रव्यापहारादिभिरघनिवहैः प्राणिहिंसादिभिर्वा
कुम्भीपाकादिरूपान् बहुविधनरकान् भुञ्जते देहिनोऽमी ।
यज्ञैर्दानैः पवित्रैः श्रुतिपथविहितैः कर्मभि (र्धर्मरूपैः)
(प्रेत्य) स्वर्गाप्तिमुख्यानिह च पशुधनाद्याप्तिमुख्यान् फलौघान् ॥ १२५ १/२ ॥

अस्ति चार्वाकदुर्वादो मोक्षस्वर्गावपि प्रति ।
लौकिकेषु सुखेष्वेव स्वर्गशब्दो नियम्यते ॥ १२६ १/२ ॥

तथा नरकशब्दोऽपि लौकिके दुःखसञ्चये ।
शरीरविनिपातस्तैर्मोक्ष इत्यभिधीयते ॥ १२७ १/२ ॥

तन्मतं निर्मलं नेति प्रागेव प्रतिपादितम् ।
शरीरव्यतिरिक्तात्मसद्भावप्रतिपादनात् ॥ १२८ १/२ ॥

प्रमाणमात्मसिद्धौ यत्तदेवान्यच्च साधयेत् ।
तत्रापवर्गविषये वादिनां बहुधा मतिः ॥ १२९ १/२ ॥

बुद्धाक्षपादसाङ्ख्यादिग्रन्थराद्धान्तसेविनाम् ।
ज्ञानानां विषयासङ्गे निखिले निर्गते सति ॥ १३० १/२ ॥

Indira Gandhi National

स्वरूपावस्थितिर्मुक्तिस्तथागतमते मता ।
विज्ञानेषु समस्तेषु प्रतिक्षणविनाशिषु ॥ १३१ १/२ ॥

कस्य मोक्षोपभोक्तृत्वं सौगतानां मते भवेत् ।
तस्मात् स्थिरतरस्यैकस्यात्मनोऽनादरे सति ॥ १३२ १/२ ॥

मुक्तेरपुरुषार्थत्वं सौगतानां प्रसज्यते ।
दुःखस्यात्यन्तिको नाशो मुक्तिरित्याह तार्किकः ॥ १३३ १/२ ॥

इन्द्रियज्ञानविषयास्त्रयः षोढा व्यवस्थिताः ।
सुखं दुःखं शरीरं चेत्येकविंशतिधा च तत् ॥ १३४ १/२ ॥

(तदयुक्तं) सुखोच्छेदाद्यतो न पुरुषार्थता ।
ननु दुःखविनाशेन तस्य स्यात् पुरुषार्थता । १३५ १/२ ॥

तन्मन्दं दुःखविच्छेदो यतः क्षुद्रतरो मतः ।
अन्यथा दुःखविच्छेदे सुषुप्तौ सत्यपि स्फुटे ॥ १३६ १/२ ॥

स्त्रीसंभोगादिलोपोत्थं दुःखं संजायते कथम् ।
सकलात्मगुणोच्छेदं मोक्षमाह प्रभाकरः ॥ १३७ १/२ ॥

सोऽप्यनेनैव विध्वस्तः सुखोच्छेदो यतः समः ।
साङ्ख्या विवेकविज्ञाने प्रकृतेः पुरुषस्य च ॥ १३८ १/२ ॥

पुरुषस्य स्वरूपावस्थानं मोक्षं प्रचक्षते ।
आनन्दादिव्यपायेनैवायं पक्षोऽप्युपेक्ष्यताम् ॥ १३९ १/२ ॥

पाषाणवदवस्थानं को वा वाञ्छति चेतनः ।
दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्तिनः ॥ १४० १/२ ॥

Centre for the Arts

सुखस्य मनसा भुक्तिर्मुक्तिरुक्ता कुमारिलैः ॥ १४१ ॥

ननु यदि संसारेऽपि स्यादयमानन्द आत्मसमवेतः ।
तर्हि कथं स जनेषु क्वचिदपि केनापि नानुभूयेत ॥ १४२ ॥

उच्यते न ह्यभिव्यक्तिः क्वाप्यभिव्यञ्जकं विना ।
न ह्यालोकं विना चक्षुः क्वापि गृह्णाति किञ्चन ॥ १४३ ॥

देहेन्द्रियतदारम्भकाणां प्रविलये सति ।
मनसः केवलस्यैव स्थित्याभिव्यज्यते च सः ॥ १४४ ॥

"आनन्दं ब्रह्मणो रूपं मोक्षेऽभिव्यज्यते च तत् ।"
इत्यादिवचनं चात्र प्रमाणत्वेन सम्मतम् ॥ १४५ ॥

निषिद्धकाम्यकर्मभ्यः सम्यग्व्यावृत्तचेतसः ।
नित्यनैमित्तिकप्रायश्चित्तप्रध्वस्तदुष्कृतेः ॥ १४६ ॥

सुखदुःखानुभूतिभ्यां क्षीणप्रारब्धकर्मणः ।
अत एव प्रतिक्षिप्तप्राप्यदेहान्तरस्य च ॥ १४७ ॥

युक्तस्य ब्रह्मचर्याद्यैरङ्गैः शमदमादिभिः ।
कुर्वाणस्यात्ममीमांसां वेदान्तोक्तेन वर्त्मना ॥ १४८ ॥

मुक्तिः सम्पद्यते सद्यो नित्यानन्दप्रकाशिनी ।
सार्धलक्षमितग्रन्थसन्दर्भप्रतिपादितः ॥ १४९ ॥
योऽर्थोऽयं संग्रहस्तस्य ब्रूमस्तस्यापि संग्रहम् ।

धर्मे वेदाः प्रमाणं त इह न कृतकाः किन्तु नित्यास्समस्ताः
वेदोक्ताभिः क्रियाभिर्भवति च विदुषां स्वर्गपश्वादिसौख्यम् ।
हिंसामुख्यैर्निषिद्धैर्भवति तनुमतां कर्मभिर्नारकाद्यं
दुःखं मोक्षः फलाशाविरहितमनसो जायते च स्वधर्मैः ॥ १५०½ ॥

इति श्रीसुब्रह्मण्यपूज्यपादशिष्यस्य नारायणस्य कृतौ भगवदज्जुकरण-
कौमारिलमतोपन्यासः समाप्तः ।

# श्लोकानुक्रमणी


| श्लोकः | | पुटम् |
|---|---|---|
| अज्ञातशब्दस्याभावे | ३ | 1 |
| अत्र दृष्टः श्रुतो वेति | ३० १/२ | 4 |
| अधर्मः प्रतिषिद्धोऽर्थः | १०४ १/२ | 12 |
| अनुमानेन वेदान्तवचसा | ११२ | 13 |
| अन्योन्यार्थक्रियायामिति तु | ७३ | 9 |
| अपि चात्मन एकत्वे | १२० | 14 |
| अप्रामाण्यं तु परतः | ६४ | 8 |
| अप्रामाण्यं स्वतस्तत्र | ६३ | 8 |
| अभावाख्यं तु वस्त्वेव | ५७ | 7 |
| अयुक्त एव मार्गोऽयम् | १२ | 2 |
| अर्थापत्तिरियं त्वन्या | ३६ १/२ | 5 |
| असन्निकृष्टवाचा च | २८ १/२ | 4 |
| अस्ति चार्वाकदुर्वादो | १२६ १/२ | 15 |
| आत्मानं स्थौल्यकार्श्यादि | १०७ १/२ | 13 |
| आत्मैव फलभोक्ता स्यात् | १०५ १/२ | 12 |
| आद्या शब्दात्मिका तत्र | ८७ | 10 |
| आनन्दं ब्रह्मणो रूपं | १४५ | 16 |
| आलोकाभावमात्रं स्यात् | ४७ | 6 |
| इति तन्मूलभूतात्र | ९२ | 11 |
| इति दृष्टा (व्यवस्था सा) | ६६ | 8 |
| इति बुद्ध्यैव विध्वस्ता | ११६ | 13 |
| इत्थं कर्तव्यमित्येवम् | ८५ | 10 |
| इत्थं भावपदार्थानां | ५४ | 7 |
| इत्थं सूत्रकृता प्रोक्ता | २६ १/२ | 4 |
| इत्यादिचिन्तासन्तानं | १०२ १/२ | 12 |
| इदं रजतमेवेति | १३ | 2 |
| इदमो रजतत्वेन | १४ | 2 |
| इदानीं दुःखितोऽस्मीति | ११७ | 14 |
| इन्द्रियज्ञानविषयास्त्रयः | १३४ १/२ | 15 |
| इह भवति शतादौ | ४१ १/२ | 6 |
| उच्यते न ह्यभिव्यक्तिः | १४३ | 16 |
| उत्तरक्षणसद्भावो | ५ | 1 |
| उपलब्धार्थवाचित्वं | ३१ १/२ | 5 |
| उपलब्धोऽर्थ इत्येव | ३२ १/२ | 5 |


Indira Gandhi National Centre for the Arts

| श्लोकः | | पुटम् |
| --- | --- | --- |
| एकत्वे पुनरेकस्मिन् | ११९ | 14 |
| एकादशविधं द्रव्यं | ४४ १/२ | 6 |
| कर्मदिक्कालवियतां | ५२ | 7 |
| कर्मप्रशंसाभिरलं प्रवृत्तौ | ९७ १/२ | 11 |
| कळायकोमळच्छायं | ४८ | 6 |
| कश्चित् सुखी भवति | ९९ १/२ | 12 |
| कस्य मोक्षोपभोक्तृत्वं | १३२ १/२ | 15 |
| किं केन कथमित्येवं | ८८ | 11 |
| किञ्चालार्थक्रियाज्ञानाद् | ७५ | 9 |
| कुलाला इति सर्वत्र | ९५ | 11 |
| कृष्यादावपि सन्देहात् | ७७ | 9 |
| केचित्तु प्रार्थनार्थाः स्युः | ८३ | 10 |
| केचित् सर्वमपि ज्ञानं | ९ | 2 |
| कौमारिलानामेवास्ति | ५३ | 7 |
| क्षीरे यो दध्यभावः | ५६ | 7 |
| गुणकर्मादिसद्भावाद् | ५१ | 7 |
| ग्राह्याः संयोगसंयुक्त० | २५ १/२ | 4 |
| घटते तत्र शाब्दस्य | ३७ १/२ | 5 |
| चार्वाकास्तावदेकं | १७ | 3 |
| चोदना चेत् समुद्धर्तुं | १०३ १/२ | 12 |
| जगद्वैचित्र्यमेवं हि | १०० १/२ | 12 |
| जालरन्ध्रविसरद्रवि० | ४६ | 6 |
| ज्योतिष्टोमेन यागेन | ९३ | 11 |
| ज्ञानानामप्रमाणत्व० | ७१ | 9 |
| तत्त्वशब्दो यथार्थार्थ० | ८ | 2 |
| तत्र केवलशब्दार्थः | ५८ | 7 |
| तत्र चशब्देन | ३५ १/२ | 5 |
| तत्रार्थवादाः सिद्धार्थाः | ८४ | 10 |
| तत्रास्य भूतलान्यत्वे | ५९ | 8 |
| तत्सतोर्व्यत्ययश्चात्र | २३ १/२ | 3 |
| तथा नरकशब्दोऽपि | १२७ १/२ | 15 |
| तदभावः शरीरादेः | १२१ | 14 |
| तन्मतं निर्मलं नेति | १२८ १/२ | 15 |
| तन्मन्दं दुःखविच्छेदो | १३६ १/२ | 16 |


Indira Gandhi National Centre for the Arts

| श्लोकः | | पुटम् |
|---|---|---|
| (तदयुक्तं) सुखोच्छेदाद् | १३५ १/२ | 15 |
| तद्वदेवानुमानादेः | २७ १/२ | 4 |
| तयोरन्यतरत्तस्माद् | ७० | 9 |
| तयोर्भेदग्रहादेव | ११ | 2 |
| तयोर्विरोधादन्योन्यं | ६५ | 8 |
| तस्मात् सर्वप्रमाणानां | ७८ | 10 |
| तस्मात् स्थूलोऽहमित्यादि | ११३ | 13 |
| तस्मादज्ञाततत्त्वार्थ० | १५ | 2 |
| तस्मादात्मा प्रतिक्षेत्रं | १२४ | 14 |
| तस्मादौपाधिकं सौक्ष्म्यं | ७ | 2 |
| तस्माद् व्यभिचरत्येव | २१ १/२ | 3 |
| तेषां दोषात्तु विज्ञाने | ६७ | 8 |
| ते हि जन्मान्तरकृतं | ११० | 13 |
| दुःखानुभव एकस्य | १२२ | 14 |
| देहे तेषां विनष्टे | १११ | 13 |
| देहेन्द्रियतदारम्भ० | १४४ | 16 |
| दोषेण करणादीनाम् | ८० | 10 |

| श्लोकः | | पुटम् |
|---|---|---|
| द्रव्यं जातिर्गुणः | ४२ १/२ | 6 |
| धर्मे वेदाः प्रमाणं त इह | १५० १/२ | 17 |
| धर्मे वेदाः प्रमाणं स्युः | १८ १/२ | 3 |
| धर्मो यागादिरूपः | १ | 1 |
| धारावाहिकविज्ञानं | ४ | 1 |
| न च विज्ञानमेवात्मा | ११५ | 13 |
| न जीवभेदस्तद्धेतुः | १२३ | 14 |
| ननु प्रत्यक्ष एवात्र | २० १/२ | 3 |
| ननु यदि संसारेऽपि | १४२ | 16 |
| नन्वर्थापत्तिरेवास्तु | ९८ १/२ | 12 |
| न हि तत्रार्थमात्रस्यैवोह | ३९ १/२ | 5 |
| नानाभूतो विभुर्नित्यो | १०६ १/२ | 12 |
| निःस्वभावत्वमेवं हि | ६८ | 8 |
| निषिद्धकाम्यकर्मभ्यः | १४६ | 17 |
| नीलादिरूपयुक्तस्य | ४९ | 6 |
| पाषाणवदवस्थानं | १४० १/२ | 16 |
| पुरुषस्य स्वरूपावस्थानं | १३९ १/२ | 16 |

| श्लोकः | | पुटम् |
|---|---|---|
| पृथिवी सलिलं तेजः | ४३ १/२ | 6 |
| प्रकृतौ सूर्यशब्दस्य | ३८ १/२ | 5 |
| प्रत्यक्षत्वं च कालस्य | ६ | 1 |
| प्रत्यक्षमनुमानं च | १६ | 3 |
| प्रत्यक्षस्यात्र वक्तव्यं | २२ १/२ | 3 |
| प्रत्यक्षादेः प्रसिद्धत्वात् | १९ १/२ | 3 |
| प्रमाकरणमेवात्र | २ | 1 |
| प्रमाणमात्मसिद्धौ यत् | १२९ १/२ | 15 |
| प्रवृत्तिः पुरुषस्यैषा | ९६ | 11 |
| प्रवृत्तिर्निश्चयाधीना | ७४ | 9 |
| प्रवृत्त्यधीना ज्ञानानां | ७६ | 9 |
| प्रागभावादिभेदेन | ५५ | 7 |
| बुद्धाक्षपादसाङ्ख्यादि० | १३० १/२ | 15 |
| ब्रह्मद्रव्यापहारादिभि० | १२५ १/२ | 14 |
| भावने द्वे च | ८६ | 10 |
| भूतलानतिरिक्तत्वे | ६० | 8 |
| भेदेन व्यवहारोऽपि | ११८ | 13 |
| मुक्तिः सम्पद्यते | १४९ | 17 |
| मुक्तेरपुरुषार्थत्वं | १३३ १/२ | 15 |
| यः सम्बन्धः स करणं | ९६ १/२ | 11 |
| यजतिस्तु प्रकृत्यर्थः | ९० | 11 |
| यत्र त्वपरिपूर्णस्य | ३३ १/२ | 5 |
| यथा तु ग्रहदोषेण | ७८ | 10 |
| यथा द्वारमिति प्रोक्ते | ३४ १/२ | 5 |
| यदि त्वर्थक्रियाज्ञानात् | ७२ | 9 |
| यागानन्तरमेवात्र | ९१ | 11 |
| युक्तस्य ब्रह्मचर्याद्यैः | १४८ | 17 |
| लोकप्रसिद्धदेहस्यैवात्मत्वं | १०९ १/२ | 13 |
| लोकानां जायमाना धीः | १०८ १/२ | 13 |
| लौकिकं वैदिकञ्चेति | २९ १/२ | 4 |
| वदन्ति साङ्ख्याः | ६२ | 8 |
| वेदवाक्यं द्विधा चेष्टं | ८२ | 10 |
| व्यवस्थेयं न मन्त्रत्वाद् | ४० १/२ | 5 |
| व्योमकालदिगादीनि | ४५ | 6 |

| श्लोकः | | पुटम् |
|---|---|---|
| सत्यं यत्किञ्चिदस्तीति | १०१ १/२ | 12 |
| सन्दष्टे शौक्ल्यभाजि | १० | 2 |
| सम्प्रयोगः सन्निकर्षः | २४ १/२ | 4 |
| सामर्थ्यं यत् प्रमाणानां | ६१ | 8 |
| सिद्धं च वेदवाक्यत्वं | ८१ | 10 |
| सुखदुःखानुभूतिभ्यां | १४७ | 17 |
| सुखस्य मनसा भुक्तिः | १४१ | 16 |
| सुखस्य सन्निवृत्तावपि | ११८ | 14 |
| सोऽप्यनेनैव विध्वस्तः | १३८ १/२ | 16 |
| स्त्रीसम्भोगादिलोपोत्थं | १३७ १/२ | 16 |
| स्पर्शयुक्तस्य सर्वत्र | ५० | 7 |
| स्वतः सन्देहरूपत्वे | ६९ | 9 |
| स्वरूपावस्थितिर्मुक्तिः | १३१ १/२ | 15 |
| स्वर्गकामादिवाक्यानां | ९४ | 11 |
| स्वर्गकामादिवाक्येषु | ८९ | 11 |


Indira Gandhi National Centre for the Arts

SANS
181.4
GUP

IGNCA RAB
ACC. No. R-411

## IN THE PRESS

1. Bhōjanakutūhala (Dietetics) of Raghunātha, Part I.
2. Tantrasamuccaya (Tantra) by Nārāyaṇa with the commentaries Vimars'inī and Vivaraṇa, Part II.
3. Sarasvatīkaṇṭhābharaṇa (Grammar) of Bhōja with the commentary Hṛdayahāriṇī of Daṇḍanātha Nārāyaṇa Part V.
4. Prakriyāsarvasva (Grammar) by Nārāyaṇa Bhaṭṭa Part IV.
5. Avantisundarīkathā (Prose) by Daṇḍin.
6. Mīmāṁsās'lōkavārtika (Mīmāṁsā) of Kumārila, with the commentary of Sucaritamis'ra.
7. Tripuradahana (kāvya) of Vāsudeva, with the commentary of Paṅkajākṣa.
8. Sītārāghava (Nāṭaka) of Rāmapāṇivāda.
9. Abhijñānas'akuntalacarcā (kāvya)
10. S'ivavilāsa (kāvya) of Dāmōdara.

---

## UNDER PREPARATION

1. Tantrasamuccaya with two commentaries - Part III.
2. Harṣacarita with the commentary Marmāvabōdhinī.
3. Bhōjanakutūhala - Part II.
4. Aṣṭāṅgahṛdaya with the commentary of Srīdāsa Pandita Part III.
5. Aitarēyabrāhmaṇa with commentary - Part III.